

तृतीयः पाठः

एषः कः? एषा का? एतत् किम्?

0672CH03

पुंलिङ्गम्

एकवचनम्	द्विवचनम्	बहुवचनम्
		
बालकः	बालकौ	बालकाः
		
वृक्षः	वृक्षौ	वृक्षाः
		
गजः	गजौ	गजाः

स्त्रीलिङ्गम्

एकवचनम्	द्विवचनम्	बहुवचनम्
		
बालिका	बालिके	बालिकाः

© NCERT not to be republished



वैद्या




वैद्ये




वैद्याः



अजा






अजे



अजाः

नपुंसकलिङ्गम्

एकवचनम्	द्विवचनम्	बहुवचनम्
 पत्रम्	 पत्रे	 पत्राणि
 चक्रम्	 चक्रे	 चक्राणि
 पुस्तकम्	 पुस्तके	 पुस्तकानि

© NCERT not to be republished

Reprint 2026-27

क्रियापदानि

एकवचनम्	द्विवचनम्	बहुवचनम्
		
पठति	पठतः	पठन्ति
		
पिबति	पिबतः	पिबन्ति
		
खादति	खादतः	खादन्ति
		
गच्छति	गच्छतः	गच्छन्ति
		
क्रीडति	क्रीडतः	क्रीडन्ति

© NCERT not to be republished

सर्वनाम-प्रयोगः



सः शुकः



तौ शुकौ



ते शुकाः



एषः बालकः



एतौ बालकौ



एते बालकाः



सा शिक्षिका



ते शिक्षिके



ताः शिक्षिकाः



एषा बालिका



एते बालिके



एताः बालिकाः



तत् फलम्



ते फले



तानि फलानि



एतत् फलम्।



एते फले



एतानि फलानि

© NCERT not to be republished

Reprint 2026-27

पुंलिङ्गम् (एकवचनम्)

सः कः ?
सः शिक्षकः।
सः किं करोति ?
सः पाठयति।
किं सः भ्रमति ?
न, सः न भ्रमति।
सः तु पाठयति।



पुंलिङ्गम् (द्विवचनम्)

तौ कौ ?
तौ मयूरौ।
तौ किं कुरुतः ?
तौ नृत्यतः।
किं तौ खादतः ?
न, तौ न खादतः।
तौ तु नृत्यतः।



पुंलिङ्गम् (बहुवचनम्)

ते के ?
ते बालकाः।
ते किं कुर्वन्ति ?
ते क्रीडन्ति।
किं ते गायन्ति ?
न, ते न गायन्ति।
ते तु क्रीडन्ति।



© NCERT not to be republished

Reprint 2026-27

पुंलिङ्गम् (एकवचनम्)

एषः कः ?

एषः शिक्षकः।

शिक्षकः किं करोति ?

शिक्षकः लिखति।

किम् एषः पठति ?

न, एषः न पठति। एषः लिखति।



पुंलिङ्गम् (द्विवचनम्)

एतौ कौ ?

एतौ बालकौ।

बालकौ किं कुरुतः ?

बालकौ पठतः।

किम् एतौ लिखतः ?

न, एतौ न लिखतः। एतौ तु पठतः।



पुंलिङ्गम् (बहुवचनम्)



एते के ?

एते बालकाः।

बालकाः किं कुर्वन्ति ?

बालकाः पिबन्ति।

किम् एते जलं पिबन्ति ?

आम्, एते जलं पिबन्ति।

© NCERT not to be republished

Reprint 2026-27

स्त्रीलिङ्गम् (एकवचनम्)

सा का ?
सा वृद्धा।
सा किं करोति ?
सा विहरति।
किं सा क्रीडति ?
न, सा न क्रीडति।
सा तु विहरति।



स्त्रीलिङ्गम् (द्विवचनम्)

ते के ?
ते अजे।
ते किं कुरुतः ?
ते चरतः।
किं ते पिबतः ?
न, ते न पिबतः।
ते तु चरतः।



स्त्रीलिङ्गम् (बहुवचनम्)

ताः काः ?
ताः महिलाः।
ताः किं कुर्वन्ति ?
ताः धावन्ति।
किं ताः गायन्ति ?
न, ताः न गायन्ति।
ताः तु धावन्ति।



© NCERT not to be republished

Reprint 2026-27

स्त्रीलिङ्गम् (एकवचनम्)

एषा का ?

एषा लता।

एषा किं करोति ?

एषा खादति।

किम् एषा पठति ?

न, एषा न पठति। एषा तु खादति।



स्त्रीलिङ्गम् (द्विवचनम्)

एते के ?

एते बालिके।

एते किं कुरुतः ?


एते भ्रमतः।

किम् एते धावतः ?

न, एते न धावतः। एते तु भ्रमतः।



स्त्रीलिङ्गम् (बहुवचनम्)



एताः काः ?

एताः अजाः।

एताः किं कुर्वन्ति ?

एताः चरन्ति।

किम् एताः धावन्ति ?

न, एताः न धावन्ति। एताः तु चरन्ति।

© NCERT not to be republished

Reprint 2026-27


नपुंसकलिङ्गम् (एकवचनम्)

तत् किम्?
तत् चन्द्रयानम्।
किं तत् विमानम्?
न, तत् विमानं न।
तत् तु चन्द्रयानम् अस्ति।



नपुंसकलिङ्गम् (द्विवचनम्)

ते के?
ते पुस्तके।
किं ते पत्रे?
न, ते पत्रे न।
ते तु पुस्तके स्तः।



नपुंसकलिङ्गम् (बहुवचनम्)

तानि कानि?
तानि रेलयानानि।
किं तानि बसयानानि?
न, तानि बसयानानि न।
तानि तु रेलयानानि सन्ति।



© NCERT not to be republished

Reprint 2026-27

नपुंसकलिङ्गम् (एकवचनम्)


एतत् किम्?

एतत् दूरदर्शनम्।

किम् एतत् सङ्गणकम्?

न, एतत् सङ्गणकं न।

एतत् तु दूरदर्शनम् अस्ति।



नपुंसकलिङ्गम् (द्विवचनम्)

एते के?

एते फले।

किम् एते कन्दुके?

न, एते कन्दुके न।

एते तु फले स्तः।



नपुंसकलिङ्गम् (बहुवचनम्)

एतानि कानि?

एतानि पुस्तकानि?

किम् एतानि सोपानानि सन्ति?

न, एतानि सोपानानि न।

एतानि तु पुस्तकानि सन्ति।



© NCERT not to be republished

उच्चैः पठन्तु स्मरन्तु अवगच्छन्तु च

पुंलिङ्गम्			स्त्रीलिङ्गम्			नपुंसकलिङ्गम्		
एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
सः	तौ	ते	सा	ते	ताः	तत्	ते	तानि
एषः	एतौ	एते	एषा	एते	एताः	एतत्	एते	एतानि
कः	कौ	के	का	के	काः	किम्	के	कानि

Reprint 2026-27

वयं शब्दार्थान् जानीमः

शब्दः	अर्थः	हिन्दी	English	मातृभाषया अर्थं लिखन्तु
लता	वल्ली	बेल	Creeper	
फलम्	फलम्	फल	Fruit	
पुस्तकम्	ग्रन्थः	पुस्तक	Book	
अजा	छागी	बकरी	Goat (Female)	
सोपानम्	आरोहणम्	सीढ़ी	Stairs	
सङ्गणकम्	सङ्गणकयन्त्रम्	सङ्गणक	Computer	
दूरदर्शनम्	दूरदर्शनम्	दूरदर्शन	Television	



वयम् अभ्यासं कुर्मः

१. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु—

यथा –	बालकः	बालकौ	बालकाः
(क)	चषकः	.....	.....
(ख)	.....	.....	देवाः
(ग)	सैनिकः	.....	.....
(घ)	.....	रजकौ	.....
(ङ)	तन्त्रज्ञः	.....	.....



२. उदाहरणानुसारं पट्टिकातः पदानि चित्वा रिक्तस्थानेषु संयोजयन्तु—

यथा –	सः शुकः	.....	.....
सः	.....	.....	.....
सा	.....	.....	.....
तत्	.....	.....	.....

शुकः	स्यूतः	अजा	फलम्
पुष्पम्	महिषी	वृक्षः	कुक्कुरः
पार्वती	पुस्तकम्		

© NCERT not to be republished

Reprint 2026-27

३. चित्राणि दृष्ट्वा संस्कृतपदानि लिखन्तु—



(क) .....



(ख) .....



(ग) .....



(घ) .....



(ङ) .....



(च) .....

४. उदाहरणानुसारं पट्टिकातः पदानि चित्वा रिक्तस्थानेषु लिखन्तु—

बालकाः	वृक्षाः	शिक्षिकाः	पुष्पम्	फलम्	अजाः
मापिकाः	गायिका	रजकः	फलानि	सः	लेखनी

	एकवचनम्	बहुवचनम्
यथा –	पुष्पम्	बालकाः
(क)	.....	.....
(ख)	.....	.....
(ग)	.....	.....
(घ)	.....	.....
(ङ)	.....	.....




© NCERT not to be republished

Reprint 2026-27

५. पट्टिकायां कानिचन पदानि सन्ति, तानि पदानि उचिते घटे पूरयन्तु—

सैनिकः चषकः गायिका महिषी जलम् कुक्कुरः द्वारम्
फलम् वृद्धा वृक्षः अजा वातायनम् अङ्कनी पुस्तकम् शुकः



६. उदाहरणानुसारं पट्टिकातः उपयुक्तपदं चित्वा रिक्तस्थानानि पूरयन्तु—

माला युवकौ पाठशाला मुखम् कमले
भवनानि बिडालः छात्राः लेखन्यौ मालाः

यथा – सा का ? सा पाठशाला।

सः कः ?	तौ कौ ?	ते के ? .....
सा का ?	ते के ?	ताः काः ? .....
तत् किम् ?	ते के ?	तानि कानि ? .....



७. निम्नलिखितानि वाक्यानि अधिकृत्य उदाहरणानुसारं प्रश्ननिर्माणं कुर्वन्तु—

यथा – सः गजः। – .....सः कः ?.....

(क) सः बालकः। – .....
(ख) सा लता। – .....
(ग) सा नदी। – .....
(घ) तत् फलम्। – .....
(ङ) सः वृक्षः। – .....

© NCERT not to be republished
Reprint 2026-27

८. परस्परं सम्बद्धानि पदानि संयोजयन्तु, रिक्तस्थानेषु पूरयन्तु च —

(क)	नर्तकी	गायति	नर्तकी नृत्यति।
(ख)	लेखकः	चालयति	.....
(ग)	फलम्	नृत्यति	.....
(घ)	कमलम्	लिखति	.....
(ङ)	चालकः	पतति	.....
(च)	गायिका	विकसति	.....



९. उदाहरणानुसारं कोष्ठकेभ्यः उचितानि पदानि चित्वा वाक्यानि रचयन्तु —

यथा – कः / का लिखति ? (लेखकः, छात्रः, सा)

लेखकः लिखति। छात्रः लिखति। सा लिखति।

(क) कः / का धावति ? (बालकः, बालिका, शुनकः)

....

(ख) कः / का पठति ? (सुरेशः, जानकी, नलिनी)

....

(ग) किं पतति ? (फलम्, जलम्, कुसुमम्)

....

(घ) का / कः गच्छति ? (शिक्षिका, बालिका, तन्त्रज्ञः)

....

(ङ) का / कः / किम् अस्ति ? (माता, पिता, वाहनम्)

....

© NCERT not to be republished

Reprint 2026-27



योग्यताविस्तरः

अकारान्तः शब्दः



यस्य शब्दस्य अन्ते 'अ'वर्णः अस्ति सः अकारान्तः शब्दः भवति।

(एतादृशः शब्दः पुंलिङ्गे अथवा नपुंसकलिङ्गे भवति।)

यथा – बालक् + अ हस्त् + अ अज् + अ

फल् + अ ज्ञान् + अ गृह् + अ

आकारान्तः शब्दः



यस्य शब्दस्य अन्ते 'आ'वर्णः अस्ति सः आकारान्तः शब्दः भवति।

(एतादृशः शब्दः प्रायशः स्त्रीलिङ्गे भवति।)

यथा – बालिक् + आ रम् + आ लत् + आ

ईकारान्तः शब्दः

यस्य शब्दस्य अन्ते 'ई'वर्णः अस्ति सः ईकारान्तः शब्दः भवति।

(ईकारान्तः शब्दः प्रायशः स्त्रीलिङ्गे भवति।)

यथा – नद् + ई लेखन् + ई घट् + ई

तत् एतत् किम्

* द्कारान्त-पुंलिङ्गस्य 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् 'सः' इति।
* द्कारान्त-पुंलिङ्गस्य 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् 'एषः' इति।
* द्कारान्त-स्त्रीलिङ्गस्य 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् 'सा' इति।
* द्कारान्त-स्त्रीलिङ्गस्य 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् 'एषा' इति।
* द्कारान्त-नपुंसकलिङ्गस्य 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् 'तत्' इति।
* द्कारान्त-नपुंसकलिङ्गस्य 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् 'एतत्' इति।
* म्कारान्त-पुंलिङ्गस्य 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् 'कः' इति।
* म्कारान्त-स्त्रीलिङ्गस्य 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् 'का' इति।
* म्कारान्त-नपुंसकलिङ्गस्य 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् 'किम्' इति।

© NCERT not to be republished

Reprint 2026-27



परियोजनाकार्यम्

१. गृहजनानां मित्राणां वा साहाय्येन पञ्चदश (१५) गृहवस्तूनामानि लिङ्गविभागेन लिखन्तु।

२. अधः केचन व्यावहारिकाः शब्दाः सन्ति। तेषाम् अर्थं शिक्षकस्य साहाय्येन अन्विष्य लिखन्तु।

अकारान्त-पुंलिङ्गम्	अकारान्त-नपुंसकलिङ्गम्	आकारान्त-स्त्रीलिङ्गम्	ईकारान्त-स्त्रीलिङ्गम्
आसन्दः	फलम्	बालिका	लेखनी
सुधाखण्डः	उपनेत्रम्	महिला	अङ्कनी
स्यूतः	युतकम्	शाटिका	दूरवाणी
विद्यालयः	मन्दिरम्	पेटिका	कूपी
वृक्षः	भवनम्	पादुका	द्रोणी
कटः	वातायनम्	उत्पीठिका	नदी
तालः	व्यजनम्	रोटिका	घटी
दर्पणः	भोजनम्	स्थालिका	नर्तकी
दीपः	कदलीफलम्	कुञ्चिका	वेणी
घटः	पाथेयपात्रम्	सूचिका	कर्तरी
दण्डदीपः	द्वारम्	तूलिका	गृहिणी
गजः	वलयम्	मञ्जूषा	मार्जनी
नागदन्तः	उद्यानम्	छुरिका	सम्मार्जनी
रजकः	सूच्यौषधम्	गृहगोधिका	सखी
धीवरः	उपांशुकम्	धूमनलिका	आकाशवाणी
युवकः	पादांशुकम्	दिनदर्शिका	वर्णलेखनी
प्रश्नः	दिनम्	खट्वा	जननी
शुनकः	उत्तरम्	शाखा	नारी
आचार्यः	उष्णीषम्	शिक्षिका	नगरी
खगः	वस्त्रम्	गुलिका	पुनःपूरणी
सागरः	नगरम्	पिपीलिका	कुमारी

© NCERT not to be republished

Reprint 2026-27